✧˖°*❋ ❋*°˖✧

# अग्निहोत्र हवन-यज्ञ मंत्र
# Agnihotra havan mantra

✧˖°*❋ ❋*°˖✧

# अग्निहोत्र यज्ञ मंत्र

**॥अथ अग्निहोत्रमंत्रः॥**

ॐ अमृतोपस्तरणमसि स्वाहा ॥१॥
ॐ अमृतापिधानमसि स्वाहा ॥२॥
ॐ सत्यं यशः श्रीर्मयि श्रीः श्रयतां स्वाहा ॥३॥

ॐ वाङ्ग आस्येऽस्तु ॥ –मुख का स्पर्श
ॐ नसोर्मे प्राणोऽस्तु ॥ –नासिका के दोनों भाग
ॐ अक्ष्णोर्मे चक्षुरस्तु ॥ – दोनों आँखें
ॐ कर्णयोर्मे श्रोत्रमस्तु ॥ – दोनों कान
ॐ बाह्वोर्मे बलमस्तु ॥ –दोनों भुजाऐं
ॐ ऊर्वोर्मे ओजोऽस्तु ॥ – दोनों जंघाएं
ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा में सह सन्तु ॥ – सारे शरीर पर

**ईश्वर की स्तुति**

ॐ विश्वानी देव सवितर्दुरितानि परासुव ।
यद भद्रं तन्न आ सुव ॥१॥

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥२॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥३॥

यः प्राणतो निमिषतो महित्वैक इन्द्राजा जगतो बभूव।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥४॥

येन द्यौरुग्रा पृथिवी च द्रढा येन स्वः स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥५॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ।
यत्कामास्ते जुहुमस्तनो अस्तु वयं स्याम पतयो रयीणाम् ॥६॥

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशाना स्तृतीये घामन्नध्यैरयन्त ॥७॥

अग्ने नय सुपथा राय अस्मान् विश्वानि देव वयुनानि विद्वान।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेँम ॥८॥

**दीपक जलाने:**
ॐ भूर्भुव: स्व: ॥

**अग्नि स्थापित:**
ॐ भूर्भुव: स्वर्द्यौरिव भूम्ना पृथिवीव वरिम्णा ।
तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे ॥

**अग्नि प्रदीप्त:**
ॐ उद् बुध्यस्वाग्ने प्रतिजागृहित्विमिष्टापूर्ते सं सृजेथामयं च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥

**घृत आहुति :**
ॐ अयन्त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्द्धस्व चेद्ध वर्धयचास्मान्
प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येन
समेधय स्वाहा । इदमग्नेय जातवेदसे – इदं न मम ॥१॥

ओं समिधाग्निं दुवस्यत घृतैर्बोधयतातिथम् ।
आस्मिन हव्या जुहोतन स्वाहा ।
इदमग्नये इदन्न मम ॥२॥

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन अग्नये जातवेदसे स्वाहा।
इदमग्नये जातवेदसे इदन्न मम ॥३॥

तन्त्वा समिद्भिरङ्गिरो घृतेन वर्द्धयामसि ।
बृहच्छोचा यविष्ठय स्वाहा॥इदमग्नेऽङ्गिरसे इदं न मम ॥४॥

**पांच आहुतिः**
ओम् अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वद्धर्स्व चेद्ध वधर्य चास्मान्
प्रजयापशुभिब्रह्मवर्चसेनान्नाद्येन
समेधय स्वाहा।इदमग्नये जातवेदसे – इदं न मम॥१॥

**जल :**
ओम् अदितेऽनुमन्यस्व॥ — पूर्व में
ओम् अनुमतेऽनुमन्यस्व॥ –पश्चिम में
ओम् सरस्वत्यनुमन्यस्व॥ — उत्तर में

**वेदी के चारों ओर जलः**
ओं देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय।दिव्यो
गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु॥

**घी आहुतिः वेदी के**
ओम् अग्नये स्वाहा | इदमग्नये – इदं न मम॥ — उत्तर भाग में
ओम् सोमाय स्वाहा | इदं सोमाय – इदं न मम॥ — दक्षिण भाग में
ओम् प्रजापतये स्वाहा | इदं प्रजापतये – इदं न मम॥ — मध्य में
ओम् इन्द्राय स्वाहा | इदं इन्द्राय – इदं न मम॥

**प्रातः कालीन आहुति के मन्त्रः**
ओम् ज्योतिर्ज्योतिः सूर्यः स्वाहा॥१॥
ओम् सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा॥२॥
ओम् ज्योतिः सूर्यः सुर्योज्योति स्वाहा॥३॥
ओम् सजूर्देवेन सवित्रा सजूरूषसेन्द्रव्यता जुषाणः सूर्यो वेतु स्वाहा॥४॥

प्रातः कालीन आहुति के शेष मन्त्रः
ओम् भूरग्नये प्राणाय स्वाहा। इदमग्नये प्राणाय – इदं न मम॥१॥
ओम् भुवर्वायवेऽपानाय स्वाहा। इदं वायवेऽपानाय -इदं न मम॥२॥
ओम् स्वरादित्याय व्यानाय स्वाहा। इदमादित्याय व्यानाय -इदं न मम॥३॥

ओम् भूभुर्वः स्वरिग्नवाय्वादित्येभ्यः प्राणापानव्यानेभ्यः स्वाहा।
इदमग्निवाय्वादित्येभ्यः प्राणापानव्यानेभ्यः – इदं न मम॥४॥

ओम् आपो ज्योतीरसोऽमृतं ब्रह्म भूभुर्वः स्वरों स्वाहा॥५॥

ओम् यां मेधां देवगणाः पितरश्चोपासते।तया मामद्य मेधयाऽग्ने मेधाविनं कुरू स्वाहा॥६॥

ओम् विश्वानि देव सवितर्दुरितानि परासुव।यद भद्रं तन्न आ सुव स्वाहा ॥७॥

अग्ने नय सुपथा राय अस्मान विश्वानि देव वयुनानि विद्वान।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्ति विधेम स्वाहा॥८॥

**सायं कालीन आहुति मन्त्रः**

ओम् अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा॥१॥
ओम् अग्निवर्चो ज्योतिर्वर्चः स्वाहा॥२॥

ओम् अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा॥३॥
ओम् सजूर्देवेन सवित्रा सजुरात्र्येन्द्रवत्या जुषाणो अग्निर्वेतु स्वाहा॥४॥

**सायं कालीन आहुति के शेष मन्त्रः**

ओम् भूरग्नये प्राणाय स्वाहा।इदमग्नये प्राणाय – इदं न मम॥१॥
ओम् भुवर्वायवेऽपानाय स्वाहा।इदं वायवेऽपानाय -इदं न मम॥२॥
ओम् स्वरादित्याय व्यानाय स्वाहा।इदमादित्याय व्यानाय -इदं न मम॥३॥
ओम् भूर्भुवः स्वरिग्नवाय्वादित्येभ्यः प्राणापानव्यानेभ्यः स्वाहा।
इदमग्निवाय्वादित्येभ्यः प्राणापानव्यानेभ्यः – इदं न मम॥४॥
ओम् आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरों स्वाहा॥५॥
ओम् यां मेधां देवगणाः पितरश्चोपासते।तया मामद्य मेधयाऽग्ने मेधाविनं कुरू स्वाहा॥६॥
ओम् विश्वानि देव सवितर्दुरितानि परासुव।यद भद्रं तन्न आ सुव स्वाहा ॥७॥
अग्ने नय सुपथा राय अस्मान विश्वानि देव वयुनानि विद्वान।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम स्वाहा॥८॥

## गायत्री मन्त्र

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात् स्वाहा॥

## पूर्णाहुति

ओम् सर्वं वै पूर्णं स्वाहा॥

## ॥इति अग्निहोत्रमन्त्राः॥

≪•◦ ❈ ◦•≫

✧.......°*❋ ❋*°.......✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net